Journal of Language and Literature ISSN: 2078-0303
Vol. 16. No. 1. March, 2026
https://mbsresearch.com/
An International, Peer Reviewed and Refereed Journal, Impact Factor-8.311

# बृहस्पतिना उक्तः विद्यारम्भमुहूर्तः

**प्रो. विश्वरञ्जनपतिः**
आचार्यः विद्याशाखाप्रमुखश्च, ज्योतिषविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा

वेदे यागानुष्ठानादीनि यज्ञकमर्माणि विधीयते । इष्टफलप्राप्तिपूर्वकयज्ञकर्मसम्पादनार्थं समुचित-शुभकालोऽपेक्ष्यते। तदर्थं वेदाङ्गभूतकालनिधानाख्यं सिद्धान्त-संहिता-होरेति त्रिस्कन्धात्मकं ज्यौतिषं शास्त्रं प्रप्रथमं ब्रह्मदेवः नारदाय कथयामास। त्रिस्कन्धज्योतिषशास्त्रस्यापि षडङ्गानि वर्तन्ते। तानि भवन्ति -

**स्कन्धत्रयात्मकं ज्योतिश्शास्त्रमेतत् षडङ्गवत्।**
**गणितं संहिता होरा चेति स्कन्धत्रयं मतम्॥**
**जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि।**
**अभिदधतीहषडङ्गान्याचार्या ज्यौतिषे महाशात्रे॥**[1]

सिद्धान्त-संहिता-होरेति त्रिस्कन्धज्यौतिषशास्त्रस्य गणित-गोल-मुहूर्त-निमित्त-प्रश्न-जातकाख्यानि षडङ्गानि वर्तन्ते। यज्ञकर्मानुष्ठानाय ज्योतिषशास्त्रस्यात्यन्तलोकोपकारकत्वादस्य शास्त्रस्य बहवः आर्षग्रन्थाः सम्प्राप्यन्ते। तेष्वार्षग्रन्थेषु बृहस्पतिविरचितं मुहूर्तविधानमन्यतमम्। ग्रन्थेऽस्मिन् संस्काराः यात्रा-वास्तु-कृषि-चिकित्सा-वाणिज्य-वशिकरण-मारण-उच्चाटन-शुभकर्मणां निर्विघ्नेन सफलतायै मुहूर्तविचारः कृतं वर्तते । एतेषु विचारणीयमुहूर्तविषयेषु विद्यारम्भमुहूर्तः सुप्रसिद्धः। यथोक्तम् आचार्यदेवर्गुरुबृहस्पतिना -

**विद्यया सर्वसिद्धिः स्यात्सम्पदः प्राप्तिरेव च।**
**समुच्चया सर्वसिद्धिः स्यात्समुच्चयाप्तिरेव च॥**

अनेनाचार्य-देवगुरुबृहस्पतिवचनेन ज्ञायते यत् नरः विद्यां प्राप्नोति चेत्तर्हि सर्वसिद्धिप्राप्तुं शक्नोति। एवं सर्वा सम्पदाः स्वतः आगच्छन्ति । अतः सर्वसिद्धिप्राप्त्यर्थं शुभमुहूर्ते विद्यारम्भः करणीयः । अतः यज्ञोपवीतसंस्कारानन्तरं त्रिकालसन्ध्या आचरणीया।

यदि भाद्रपदमासस्य पूर्णिमातिथौ कन्याराशिं प्रति सूर्यसंक्रमणं भवति तदा सरस्वतीयोगः सम्भवति तदा विद्यारम्भसंस्कारः क्रियते चेत् चतुर्दशविद्याज्ञानं भवति। नाम सः विशिष्टविद्वान् भवतीत्यर्थः।

**कन्यार्के यदि संयुक्ते योगे सारस्वते तदा।**
**आरम्भेत्सर्ववेदांश्च विद्याश्चैव चतुर्दशः॥**

एतस्मिन् कालाभावे शुभमासे उत्तरायणस्य प्रथमतृतीयमासेषु विद्यारम्भशुभः इति। वेदोक्तप्रमाणं वर्तते । ब्रह्मा-विष्णु-महेश्वराः एते त्रिदेवाः विद्यां प्रयच्छन्ति । तदर्थं सौम्यादयः चतस्त्रः ताराः मृगशिराहस्तस्वातिचित्राः नक्षत्राणि शुभानि भवन्ति।

**विद्या प्रभावमेतेषां त्रिमूर्तिनां त्रिमूर्तिता।**
**ताराश्चतस्त्रः सौम्याद्या हस्तास्तिस्त्रः सवैष्टवाः॥**

मुहूर्तचिन्तामणिकारः-

[1] प्र.मा./प्र.अ./श्लो.सं. ६

**गणेश-विष्णु-वाग्रमाः प्रपूज्य पञ्चमाब्दके।**
**तिथौ शिवार्कदिग्विष्टशरत्रिके रवावुदक्॥**
**लघुश्रवोऽनिलान्त्यभादितोशतक्षमित्रभे।**
**चरोनसत्तनौ शिशोर्लिपिग्रहः सतां दिने॥**[2]

मुहूर्तमार्तण्डे -

**विद्यां मौञ्जयुक्तकाले स्थिरचरहरिजत्र्यत्तरब्राह्महीने।**
**मौञ्जया ऊर्ध्वं गणेशं गिरमपि विधिवत्पूजित्वारभेत॥**[3]

अनुराधा, अश्विनीनक्षत्रे च विद्यारम्भः शुभकरः। एवं उत्तराफाल्गुनी, उत्तराषाढा, उत्तरभाद्रपद, रेवती, रोहिणीनक्षत्रेषु तथा सारस्वतयोगे एवं सप्तर्षियोगे दृष्टे प्रतिपदा-द्वितीया-तृतीया-पञ्चमी-षष्ठी-दशमी तथा एकादशीतिथिषु विद्यारम्भः अत्यन्तं शुभकरं भवति। सप्तमी, त्रयोदशीतिथ्योः विद्यारम्भः अशुभः। कदाचित् सप्तमी, त्रयोदशीतिथ्योः विद्यारम्भः शुभः स्यात्। रिक्तातिथयः (४,९,१४) विद्यारम्भे सर्वदा वर्जनीयाः। यथोक्तं आचार्यबृहस्पतिना-

**प्रथमा च द्वितीया च तृतीया पञ्चमी तथा।**
**षष्ठी च दशमी चैवमैकादश्यः सुपूजिताः॥**
**विघ्नदौ वर्जितव्यौ तौ सप्तमी च त्रयोदशी।**
**रिक्तानध्यायसंज्ञा ये विशेषा ते विवर्जिताः॥**
**त्रयोदश्यापि सप्तम्या कदाचिच्छुभदा तिथिः॥**

मुहूर्तचिन्तामणिकारः -

**मृगात्कराच्छुतेस्त्रयेऽश्विमूलपूर्विकात्रये**
**गुरुद्वयऽर्कजीवविवित्सितेऽह्नि षड्गरत्रिके।**
**शिवार्कदिग्द्विके तिथौ ध्रुवान्त्यमित्रभे परैः**
**शुभैरधितिरुमा त्रिकोणकेन्द्रगैः स्मृताः॥**[4]

यदा चन्द्रः बुधनवांशे, बुधश्च बृहस्पतिशुक्राभ्यां संदृष्ट तदा वारवर्ग, लग्नं प्रति शनिमङ्गलयोः दृष्टिः वर्तेते चेदपि विद्यारम्भः न अशुभकरः। रविचन्द्रयोः योगः मध्यमसंज्ञकः। अन्येषां ग्रहाणां योगे तु उत्तमः। चरस्थिरद्विस्वभावराशयः विद्यारम्भे यथाक्रमं मध्यमः, उत्तमः, अधमश्च भवति।

**मध्यमौ रविशीतांशौः शेषाणामुत्तमाः स्मृताः।**
**चरस्थिरोभयाः नक्षत्रा मध्यमाधमपूजिताः॥**

**यदा चन्द्रो बुधांशस्थौ बुधजीवसितेक्षितः।**
**वारवर्गोदया वर्ज्या दर्शनं चार्किभौमयोः॥**

विद्यायोगे दृष्टः ग्रहाः पूज्याः भवन्ति। विद्या आरम्भसमये पापग्रहः तृतीय-षष्ठ एकादश एवं शुभग्रहाः त्रिकोण-पञ्चम-नवमभावेषु शुभाः भवन्ति।

[2] **मुहूर्तचिन्तामणिः ५/३७**
[3] **मुहूर्तमार्तण्डः ३/१८**
[4] **मुहूर्तचिन्तामणिः ५/३८**

**विद्यायोगेषु दृष्टेषु सर्वे पूज्यतमा ग्रहाः ।**
**त्रिषडायगताः पापास्त्रिकोणे कण्टके शुभाः ।।**

विद्यारम्भे पापाः विहाय सर्वे शुभग्रहाः पञ्चमे शुभाः। पापग्रहाणां संयोगे न भवति चेत् लग्ने चन्द्रस्य पुत्रः बुधः विशेषरूपेण शुभः भवति। तथा सप्तमे शुभग्रहाः पापग्रहाः वा शुभाः न भवन्ति। एवं लग्ने विशेषरूपेण शुभग्रहाः शुभाः भवन्ति। यथा बृहस्पतिना-

**विद्यारम्भे सुपूज्यास्स्युः पञ्चमे पापवर्जिते।**
**पञ्चमस्थाः शुभास्सर्वे सुपूज्या नीचवर्जिताः ।।**
**विशेषादुदितस्सौम्यः पापसंयोगवर्जितः ।**
**न कोऽपि सप्तमे पूज्यस्थितः क्रूरोऽपि वा पुनः ।**
**विशेषाच्छुभगे लग्ने शुभग्रहयुते शुभः ।।**

भेरी-ताल-नाट्य-सङ्गीत-सामुद्रिकादिषु अध्ययनाय हस्त-पुष्प-पुनर्वसुनक्षत्रे शुभावहाः भवन्ति।

**भेरीतालादिशास्त्रेषु नाट्ये सामुद्रिकाह्वये।**
**हस्तस्तिष्यस्तथादित्यः सङ्गीते सौम्यमेव च ।।**

गान्धर्व-नीतिशाख-शकुनशास्त्र तथा वेदज्ञानाय रोहिणी-आश्लेषानक्षत्रे शुभे।

**गान्धर्वे नीतिशास्त्रे च प्रशस्तौ पवनादिति।**
**सार्पश्शकुनिकज्ञाने वेदे रोहिण्य हि शुभौ ।।**

धनुर्वेदः तथा आयुर्वेदाध्ययनार्थं धनिष्ठा प्रशस्तः। परन्तु अन्यशास्त्राणाम् अध्ययनाय विशेषरूपेण शुभः भवति।

**वासवं स्याद् धनुर्वेदे चायुर्वेद विशेषतः ।**
**हस्तो बहूनां शास्त्राणां विशेषेण प्रशस्यते ।।**

अर्थशास्त्र-क्षुरिका-वेदशान्तिक गन्धक-मल्लविद्या-तुरग-हस्ति-रूपविद्यादि अभ्यासार्थ हस्तानक्षत्रं शुभं भवति।

**कौटिल्ये क्षुरिकागेये वेदशान्तिकगन्धके।**
**मल्ले महानसे खड्गे रूपे तुरगवारणे ।।**

शाखाभ्यासः च अधिरोहणे आद्रा-पुष्य-त्र्युत्तरा-पूषा-श्रवणा-रोहिणी स्वात्पादयः नक्षत्राणि शुधानि। कुक्कुटशास्त्र-आयुर्वेदयोः अनुराधा, गजाश्वयोः आरोहणे भूयसंज्ञकनक्षत्राणि (रोहिणी-उत्तरफाल्गुनि-उत्तराषाढा-उत्तरभाद्रपद) शुभानि।

**शास्त्राभ्यासेऽधिरोहे च रौद्रतिष्योत्तरत्रयम्।**
**पुष्यश्रवणरोहिण्यः सौम्यवायु च शोभनाः ।।**
**मैत्रः कुकुटशास्त्रे स्यादायुर्वेदे गजाश्वयोः ।**
**तयोरारोहणे चैव ध्रुवभानि शुभानि च ।।**

गजाश्वयोः विद्ययोः अश्विनी, चित्रकविद्यासु स्वाति-अनुराधा-पुनर्वसुनक्षत्राणि शुभानि।

**अश्विनी चाश्वविद्यायां गजविद्यासु सोमनम्।**
**त्वाष्ट्रं चित्रकविद्यासु स्वाती मैत्रं पुनर्वसु ।।**

गजविद्याज्ञानार्थं जन्मनक्षत्रं शुभं ज्ञेयम् । जन्मनक्षत्रस्य पूर्वार्धं नरेभ्यः उत्तरार्धं च अङ्गनानाम्,

अश्वविद्यायां पूर्वाषाढ-अश्विनीनक्षत्रे स्त्रीपुरुषाभ्यां श्रवणनक्षत्रं शुभं भवति। यथा-

**गजानां जन्मभं सौम्यं पुमान् पूर्वे पराङ्गना।**
**हयानां वारुणाश्विन्योः स्त्रीपुंसोर्जन्मभे हरेः ।।**

धर्मशास्त्राध्ययनाय पूर्वाषाढा-उत्तराषाढा-श्रवणा-धनिष्ठा एवं रेवती-अश्विनी पुष्प-हस्त-चित्रा-स्वाति-विशाखा-अनुराधा-ज्येष्ठानक्षत्राणि शुभानि।

**धर्मशास्त्रेषु विश्वाद्यत्रितयं पौष्णमेव च।**
**अश्विनी रोहिणी सौम्यं पुष्यं हस्तादिपञ्चकम् ।।**

ज्योतिःशास्त्रवेदाङ्गशास्त्राणामध्ययनेस्वाती-हस्त-पुनर्वसु-रेवती-अश्विनी-मूल-शतभिषादि नक्षत्राणि शुभानि।

**ज्योतिषाद्यङ्गशास्त्राणां स्वाती हस्तपुनर्वसु।**
**पौष्णहस्ताश्विनीमूलवारुणाः स्युः सुपूजिताः ।।**

योगशास्त्राभ्यासे मृगशिरा-शतभिषा, आयुर्वेदाध्ययने हस्त-स्वाती-अश्विनी-पुष्यनक्षत्राणि श्रेष्ठानि भवन्ति। यथोक्तम् आचार्यबृहस्पतिना-

**वारुणं योगशास्त्रेषु समयेष्विन्दुभं शुभम्।**
**हस्तस्वात्याश्विसौम्यास्स्युरायुर्वेदे सुपूजिताः ।।**

शब्दशास्त्राध्ययने धनिष्ठा-रेवती-मृगशिरा-रोहिणी-पुष्य-अनुराधा-पुनर्वसु-हस्तनक्षत्राणि प्रशस्तानि। गणितशास्त्राध्ययने रेवती-हस्त-अनुराधा-पुष्य-आद्रा-धनिष्ठानक्षत्राणि पुनः ज्यौतिष-शास्त्राध्ययने रोहिणी-शतभिषा च शुभे।

**वासवो रेवती सौम्यरोहिणीपुष्यमैत्रभे।**
**पुनर्वसु च हस्तश्च शब्दशास्त्रेषु पूजिताः ।।**
**गणिते रेवती हस्तमैत्रपुष्यार्द्रवासवाः।**
**ज्योतिः शास्त्रे निमित्ते च रोहिणी वारुणे शुभे ।।**

अर्थशास्त्राध्ययने पुनर्वसु-श्रवण-स्वाती-पुष्य-हस्त-अश्विनी-शतभिषा-उत्तरात्रय-रोहिणी-नक्षत्राणि शुभानि।

**आदित्यो वैष्ववस्स्वातीतिष्यहस्ताश्विवारुणाः।**
**त्रीण्युत्तराणि रोहिण्योऽप्यर्थशास्त्रे सुपूजिताः ।।**

क्षिप्रसंज्ञकनक्षत्रेषु (अश्विनि-पुष्य-हस्त-अभिजित) शैवागम। तथा चरसंज्ञकनक्षत्रेषु वैष्णवागमस्य अध्ययनं करणीयम्।

**शैवागमे शुभान्याहुः क्षिप्राण्युग्राणि मान्यपि।**
**ततो विष्णवागमे शस्तश्चरः साधारणानिभम् ।।**

ध्रुवनक्षत्रेषु (रोहिणी-उत्तरफाल्गुनी-उत्तरषाढा-उत्तरभाद्रपद) सर्वसाधारणान्यपि सर्वे शास्त्राणां तथा सर्वविद्यासु सर्वप्रकारस्य ज्ञानाय मृदुर्सज्ञकनक्षत्रेषु (मृगशिरा-अनुराधा-चित्रा-रेवती) अध्ययनं प्रारम्भणीयम्।

**ध्रुवाणि सर्वशास्त्रेषु सर्वसाधारणान्यपि।**
**मृदुनि सर्वविद्यासु सर्वज्ञानेषु भान्यपि ।।**

**मृदुध्रुवक्षिप्रचरे ज्ञे गुरौ वा खलग्नगे।**
**विधौ जीववर्गस्थे शिल्पविद्या प्रशस्यते ।।**[5]

उपरि उक्तानि शुभमुहूर्तेषु शुभवारे, शुभांशे, शुभदृष्टियुते विद्यारम्भः शुभः भवति। विशेषरूपेण बुधस्य लग्नवर्गहोरावासरादियुतो दृष्टो चेत् तथा बुधः अस्तगतः न स्यात्तर्हि शास्त्राध्ययनाय शुभमुहूर्त इति सर्वे आचार्याः समर्थयन्ति। यथोक्तं च बृहस्पतिना-

**विशेषाद्बुधवर्गेषु बुधदृष्टे बुधोदये।**
**बुधवारे च होरायां शंसन्ति ज्ञेऽप्यनस्तगे ।।**
**एषु सर्वेषु शास्त्रेषु शुभस्यादितरेषु च।**
**अपवादो न चेत्तत्र योगान् वक्ष्याम्यभीष्टदान् ।।**

आचार्यबृहस्पतिः द्वारा उक्तेषु विद्यारम्भमुहूर्तेष्वध्ययनारम्भेण शास्त्रज्ञानं समीचीनं भवति । अतः शुभमुहूर्त्तेषु विद्यारम्भेण मन्दबुद्धिः बालकः अपि शुभसमयकारणात् बुद्धिमानः भवितुम् अर्हति । अर्थात् अक्षरज्ञानार्थं शुभमुहूर्त्तस्य मान्यता प्राचीनकालाद् अधुना पर्यन्तम् अस्माकं समाजे प्रथमस्थाने अस्ति, यतोहि विद्यायाः एव स्वकर्तव्यस्य बोधः भवति। अतः कर्तव्यनिष्ठायां कार्ये च आसक्तिः एव, जीवनस्य सफलता वर्तते। अर्थात् विद्वांसो हि देवाः अत एव जीवने उपयोगं कृत्वा लाभः स्वीकुर्वन्तु इति प्रार्थनया वरमामि विस्तरभयात्।

**सन्दर्भग्रन्थसूची -**

1. बृहस्पतिविरचितं मुहूर्तविधानम् (षोडशोऽध्यायः)।
2. श्रीरामदैवज्ञकृतः मुहूर्त्तचिन्तामणिः।
3. मुहूर्तमार्तण्डः

[5] **मु.मा. ४१**